



श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्

श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

तैत्तिरीय उपनिषत्

taittirIya upaniShat

तैत्तिरीय उपनिषत्

॥ शीक्षावल्ली ॥

॥ हरिः ओ(४)म् ॥

शं नो॑ मि॒त्रश्शं वरु॑णः । शं नो॑ भवत्वर्य॒मा । शं न॒ इन्द्रो॒ बृह॒स्पति॑ः ।
शं नो॒ विष्णु॑रुरुक्र॒मः । नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि ।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि । ऋ॒तं व॑दिष्यामि । स॒त्यं व॑दिष्यामि । तन्माम॑वतु ।
तद्व॒क्तार॑मवतु । अव॑तु॒ माम् । अव॑तु व॒क्तार᳚म् । ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥ ॥ १ ॥

शीक्षां व्या᳚ख्यास्या॒मः । वर्ण॒स्स्वरः । मात्रा॒ बलम् । साम॑ सन्ता॒नः ।
इत्युक्तः शी᳚क्षाध्या॒यः ॥ २ ॥

स॒ह नौ॒ यशः । स॒ह नौ ब्र॑ह्मव॒र्चसम् । अथातः स॒ꣳहिताया उपनिषदं॑ व्या᳚ख्यास्या॒मः ।
पञ्चस्वधिक॑रणे॒षु । अधिलोकम् अधिज्यौतिषम् अधिविद्यं अधिप्रज॑मध्या॒त्मम् ।
ता महा स॒ꣳहिता इ॑त्याच॒क्षते । अथा॑धिलो॒कम् । पृथिवी पू᳚र्वरू॒पम् । द्यौरुत्त॑ररू॒पम् ।
आका॑शस्स॒न्धिः ॥ ३ ॥

वायु॑स्सन्धा॒नम् । इत्य॑धिलो॒कम् । अथा॑धिज्यौ॒तिषम् । अग्निः पू᳚र्वरू॒पम् ।
आदित्य उत्त॑ररू॒पम् । आ॑पस्स॒न्धिः । वैद्युत॑स्सन्धा॒नम् । इत्य॑धिज्यौ॒तिषम् ।
अथा॑धिवि॒द्यम् । आचार्यः पू᳚र्वरू॒पम् ॥ ४ ॥

अन्तेवास्युत्त॑ररू॒पम् । वि॑द्या स॒न्धिः । प्रवचनꣳ॑ सन्धा॒नम् । इत्य॑धिवि॒द्यम् । अथाधि॒प्रजम् ।
माता पू᳚र्वरू॒पम् । पितोत्त॑ररू॒पम् । प्र॑जा स॒न्धिः । प्रजननꣳ॑ सन्धा॒नम् ।
इत्यधि॒प्रजम् ॥ ५ ॥

तैत्तिरीय उपनिषत्

अथाध्यात्मम्। अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तररूपम्। वाक्सन्धिः।

जिह्वा सन्धानम्। इत्यध्यात्मम्। इतीमा महा सꣳहिताः।

य एवमेता महा सꣳहिता व्याख्याता वेद। सन्धीयते प्रजया पशुभिः।

ब्रह्म वर्च सेनान्नाद्येन सुवर्ग्येण लोकेन ॥ ६ ॥

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृताथ्संबभूव। स मेन्द्रो मेधया स्पृणोतु।

अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा।

कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधयापिहितः। श्रुतं मे गोपाय।

आवहन्ती वितन्वाना ॥ ७ ॥

कुर्वाणा चीरमात्मनः। वासाꣳसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह।

लोमशां पशुभिस्सह स्वाहा।

आमायन्तु ब्रह्मचारिणस्स्वाहा ॥ ८ ॥

यशो जनेऽसानि स्वाहा।

श्रेयान् वस्यसोऽसानि स्वाहा।

तं त्वा भग प्रविशानि स्वाहा।

स मा भग प्रविश स्वाहा।

तस्मिन्थ्सहस्रशाखे निभगाहं त्वयि मृजे स्वाहा।

यथाऽऽपः प्रवताऽऽयन्ति। यथा मासा अहर्जरम्।

एवं मां ब्रह्मचारिणः।

धातरायन्तु सर्वतस्स्वाहा।

प्रतिवेशोऽसि प्रमा भाहि प्रमा पद्यस्व ॥ ९ ॥

तैत्तिरीय उपनिषत्

भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामुहस्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते।
मह इति। तत् ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः।
भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः ॥ १० ॥

मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते।

भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः। मह इति चन्द्रमाः।
चन्द्रमसा वाव सर्वाणि ज्योतीꣳषि महीयन्ते।
भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूꣳषि ॥ ११ ॥

मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते।
भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः। मह इत्यन्नम्।
अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एतास् चतस्रस् चतुर्धा।
चतस्रस् चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म।
सर्वेऽस्मै देवा बलिमावहन्ति ॥ १२ ॥

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः।
अन्तरेण तालुके। य एषस्तन इवावलंबते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते।
व्यपोह्य शीर्षकपाले। भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ ॥ १३ ॥

सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्।
वाक्पतिश् चक्षुष्पतिः। श्रोत्रपतिर् विज्ञानपतिः। एतत्ततो भवति। आकाश शरीरं ब्रह्म।
सत्यात्म प्राणारामं मन आनन्दम्। शान्ति समृद्धममृतम्।
इति प्राचीन योग्योपास्व ॥ १४ ॥

तैत्तिरीय उपनिषत्

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर् वायुर् आदित्यश् चन्द्रमा नक्षत्राणि ।
आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् ।
प्राणो व्यानोऽपान उदानस्समानः । चक्षुः श्रोत्रं मनो वाक् ।
त्वक् चर्म माꣳसग्ग् स्नावास्थि मज्जा । एतदधि विधाय ऋषिरवोचत् ।
पाङ्क्तं वा इदꣳ सर्वम् । पाङ्क्तेनैव पाङ्क्तग्ग् स्पृणोतीति ॥ १५ ॥

ओमिति ब्रह्म । ओमितीदꣳ सर्वम् ।
ओमित्येतदनु कृति हस्म वा अप्यो श्रावयेत्या श्रावयन्ति । ओमिति सामानि गायन्ति ।
ओꣳ शोमिति शस्त्राणि शꣳसन्ति । ओमित्य ध्वर्युः प्रतिगरं प्रतिगृणाति ।
ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्र मनुजानाति ।
ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ १६ ॥

ऋतं च स्वाध्याय प्रवचने च ।
सत्यं च स्वाध्याय प्रवचने च ।
तपश्च स्वाध्याय प्रवचने च ।
दमश्च स्वाध्याय प्रवचने च ।
शमश्च स्वाध्याय प्रवचने च ।
अग्नयश्च स्वाध्याय प्रवचने च ।
अग्निहोत्रं च स्वाध्याय प्रवचने च ।
अतिथयश्च स्वाध्याय प्रवचने च ।
मानुषं च स्वाध्याय प्रवचने च ।
प्रजा च स्वाध्याय प्रवचने च ।
प्रजनश्च स्वाध्याय प्रवचने च ।
प्रजातिश्च स्वाध्याय प्रवचने च ।

तैत्तिरीय उपनिषत्

सत्यमिति सत्यवचा राथीतरः ।

तप इति तपोनित्यः पौरुशिष्टिः ।

स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः ।

तद्धि तपस् तद्धि तपः ॥ १७ ॥

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्व पवित्रो वाजिनीव स्वमृतमस्मि ।
द्रविणꣳ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानु वचनम् ॥ १८ ॥

वेदमनूच्या चार्योऽन्ते वासिन मनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्या यान्मा प्रमदः ।
आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।

सत्यान्न प्रमदितव्यम् ।

धर्मान्न प्रमदितव्यम् ।

कुशलान्न प्रमदितव्यम् ।

भूत्यै न प्रमदितव्यम् ।

स्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम् ॥ १९ ॥

देव पितृ कार्याभ्यां न प्रमदितव्यम् ।
मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।
यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि ।
यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥ २० ॥

नो इतराणि । ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः । तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् ।

श्रद्धया देयम् ।

अश्रद्धयाऽदेयम् ।

श्रिया देयम् ।

ह्रिया देयम् ।

भिया देयम् ।

संविदा देयम् ।

अथ यदि ते कर्म विचिकित्सा वा वृत्त विचिकित्सा वा स्यात् ॥ **२१** ॥

ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामास्स्युः ।
यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु ।
ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामास्युः ।
यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् ।
एतदनुशासनम् । एवमुपासितव्यम् । एवमुचैतदुपास्यम् ॥ **२२** ॥

शं नो मित्रश्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः ।
शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि ।
त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् ।
तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ।
ओं शान्तिः शान्तिः शान्तिः ॥ ॥ **२३** ॥

॥ हरिः ओ(३)म् ॥

॥ इति शीक्षावल्ली समाप्ता ॥

तैत्तिरीय उपनिषत्

॥ आनन्दवल्ली ॥

॥ हरिः ओ(४)म् ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।
ओं शान्तिः शान्तिः शान्तिः ॥

ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म ।
यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान्सह । ब्रह्मणा विपश्चितेति ।
तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः ।
अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात् पुरुषः ।
स वा एष पुरुषोऽन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः ।
अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीग्ंश्रिताः । अथो अन्नेनैव जीवन्ति ।
अथैनदपि यन्त्यन्ततः । अन्नग्ं हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते ।
सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नग्ं हि भूतानां ज्येष्ठम् ।
तस्मात् सर्वौषधमुच्यते । अन्नाद् भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते ।
अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात् ।
अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव ।
तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः ।
अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा ।
तदप्येष श्लोको भवति ॥ २ ॥

तैत्तिरीय उपनिषत्

प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः।
तस्मात् सर्वायुषमुच्यते। सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते।
प्राणो हि भूतानामायुः। तस्मात् सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा।
यः पूर्वस्य। तस्माद्वा एतस्मात् प्राणमयात्। अन्योऽन्तर आत्मा मनोमयः।
तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः।
तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा।
अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ ३ ॥

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्।
न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य।
तस्माद्वा एतस्मान् मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः।
स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः।
ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति ॥ ४ ॥

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवास्सर्वे। ब्रह्म ज्येष्ठमुपासते।
विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा।
सर्वान्कामान्त्समश्नुत इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य।
तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः।
स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः।
मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति ॥ ५ ॥

तैत्तिरीय उपनिषत्

असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य।
कश्चन गच्छती ३। आहो विद्वानमुं लोकं प्रेत्य। कश्चित्स मश्नुता ३ उ। सोऽकामयत।
बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदगुं सर्वमसृजत। यदिदं किञ्च।
तथ्सृष्ट्वा। तदेवानुप्राविशत्। तदनु प्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च।
निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्।
यदिदं किञ् च। तथ्सत्यमित्याचक्षते। तदप्येष श्लोको भवति ॥ ६ ॥

असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानग्ग् स्वयमकुरुत।
तस्मात् तत् सुकृतमुच्यत इति। यद्वै तत् सुकृतम्। रसो वै सः।
रसग्ग् ह्येवायं लब्ध्वाऽऽनन्दी भवति। को ह्येवान्यात् कः प्राण्यात्।
यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति।
यदा ह्येवैष एतस्मिन्नदृश्येऽ–नात्म्ये-निरुक्ते-निलयने भयं प्रतिष्ठां विन्दते।
अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन् उदरमन्तरं कुरुते।
अथ तस्य भयं भवति। तत्वेव भयं विदुषोऽमन्वानस्य। तदप्येष श्लोको भवति ॥ ७ ॥

भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति।
सैषाऽऽनन्दस्य मीमाꣳसा भवति। युवा स्यात्साधु युवाऽध्यायकः।
आशिष्ठो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णास्यात्।

स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः।

स एको मनुष्य गन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य।
ते ये शतं मनुष्य गन्धर्वाणामानन्दाः।

तैत्तिरीय उपनिषत्

स एको देव गन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य ।
ते ये शतं देव गन्धर्वाणामानन्दाः ।

स एकः पितृणां चिरलोक लोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य ।
ते ये शतं पितृणां चिरलोक लोकानामानन्दाः ।

स एक आजानजानां देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य ।
ते ये शतं आजानजानां देवानामानन्दाः ।

स एकः कर्मदेवानां देवानामानन्दः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य ।
ते ये शतं कर्मदेवानां देवानामानन्दाः ।

स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानन्दाः ।

स एक इन्द्रस्यानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः ।

स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः ।

स एकः प्रजापतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः ।

स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे । यश्चासावादित्ये ।
स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य ।

एतम् अन्नमयमात्मानम् उपसङ्क्रामति ।
एतं प्राणमयमात्मानम् उपसङ्क्रामति ।
एतं मनोमयमात्मानम् उपसङ्क्रामति ।
एतं विज्ञानमयमात्मानम् उपसङ्क्रामति ।
एतम् आनन्दमयमात्मानम् उपसङ्क्रामति ।

तदप्येष श्लोको भवति ॥ ८ ॥

तैत्तिरीय उपनिषत्

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्।
न बिभेति कुतश्चनेति। एतꣳ ह वाव न तपति। किमहꣳ साधु नाकरवम्।
किमहं पापमकरवमिति। स य एवं विद्वानेते आत्मानग्ग् स्पृणुते।
उभे ह्येवैष एते आत्मानग्ग् स्पृणुते। य एवं वेद। इत्युपनिषत्। ॥९॥

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै।
ओं शान्तिः शान्तिः शान्तिः ॥

॥ हरिः ओ(३)म् ॥

॥ इति आनन्दवल्ली समाप्ता ॥

तैत्तिरीय उपनिषत्

॥ भृगुवल्ली ॥

॥ हरिः ओ(४)म् ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।
ओं शान्तिः शान्तिः शान्तिः ॥

भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत् प्रोवाच ।
अन्नं प्राणं चक्षुश् श्रोत्रं मनो वाचमिति । तꣳ होवाच ।
यतो वा इमानि भुतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभि-संविशन्ति ।
तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

अन्नं ब्रह्मेति व्यजानात् । अन्नाध्येव खल्विमानि भुतानि जायन्ते ।
अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभि-संविशन्तीति । तद्विज्ञाय ।
पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच ।
तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ २ ॥

प्राणो ब्रह्मेति व्यजानात् । प्राणाध्येव खल्विमानि भूतानि जायन्ते ।
प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभि-संविशन्तीति । तद्विज्ञाय ।
पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच ।
तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ३ ॥

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते ।
मनसा जातानि जीवन्ति । मनः प्रयन्त्यभि-संविशन्तीति । तद्विज्ञाय ।
पुनरेव वरुणं पितरमुपस सार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच ।
तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तत्वा ॥ ४ ॥

तैत्तिरीय उपनिषत्

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते।

विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभि-संविशन्तीति। तद्विज्ञाय।

पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच।

तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ ५ ॥

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते।

आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभि-संविशन्तीति।

सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति।

अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर् ब्रह्मवर्चसेन। महान् कीर्त्या ॥ ६ ॥

अन्नं न निन्द्यात्। तद् व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्।

शरीरे प्राणः प्रतिष्ठितः। तदेत-दन्न-मन्ने प्रतिष्ठितम्।

स य एत-दन्न-मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति।

महान् भवति प्रजया पशुभिर् ब्रह्मवर्चसेन। महान् कीर्त्या ॥ ७ ॥

अन्नं न परिचक्षीत। तद् व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्।

अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतिष्यापः प्रतिष्ठिताः। तदेत-दन्न-मन्ने प्रतिष्ठितम्।

स य एत-दन्न-मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति।

महान् भवति प्रजया पशुभिर् ब्रह्मवर्चसेन। महान् कीर्त्या ॥ ८ ॥

अन्नं बहु कुर्वीत। तद् व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः।

पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेत-दन्न-मन्ने प्रतिष्ठितम्।

स य एत-दन्न-मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति।

महान् भवति प्रजया पशुभिर् ब्रह्मवर्चसेन। महान् कीर्त्या ॥ ९ ॥

तैत्तिरीय उपनिषत्

न कञ्चन वसतौ प्रत्याचक्षीत। तद् व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्।
अराध्यस्मा अन्नमित्याचक्षते।

एतद्वै मुखतोऽन्नꣳ राद्धम्। मुखतोऽस्मा अन्नꣳ राध्यते।

एतद्वै मध्यतोऽन्नꣳ राद्धम्। मध्यतोऽस्मा अन्नꣳ राध्यते।

एतद्वा अन्ततोऽन्नꣳ राद्धम्। अन्ततोऽस्मा अन्नꣳ राध्यते।

य एवं वेद। क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः।
कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ।

इति मानुषीः समाज्ञाः। अथ दैवीः। तृप्तिरिति वृष्टौ। बलमिति विद्युति।
यश इति पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजाति-रमृतमानन्द इत्युपस्थे। सर्वमित्याकाशे।

तत् प्रतिष्ठेत्युपासीत। प्रतिष्ठावान् भवति।

तन्मह इत्युपासीत। महान् भवति।

तन्मन इत्युपासीत। मानवान् भवति।

तन्नम इत्युपासीत। नम्यन्तेऽस्मै कामाः।

तद् ब्रह्मेत्युपासीत। ब्रह्मवान् भवति।

तद् ब्रह्मणः परिमर इत्युपासीत। पर्येणं म्रियन्ते द्विषन्तस् सपत्नाः।
परि येऽप्रिया भ्रातृव्याः। स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः।
स य एवं वित्। अस्माल्लोकात् प्रेत्य।

एतम् अन्नमयम् आत्मानमुपसङ्क्रम्य।

एतं प्राणमयम् आत्मानमुपसङ्क्रम्य।

एतं मनोमयम् आत्मानमुपसङ्क्रम्य।

एतं विज्ञानमयम् आत्मानमुपसङ्क्रम्य।

एतम् आनन्दमयम् आत्मानमुपसङ्क्रम्य।

तैत्तिरीय उपनिषत्

इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्। एतत् साम गायन्नास्ते।

हा ३ वु हा ३ वु हा ३ वु।

अह-मन्न-मह-मन्न-मह-मन्नम्।

अहमन्नादो २ ऽहमन्नादो २ ऽहमन्नादः।

अहग्ग् श्लोक कृदहग्ग् श्लोक कृदहग्ग् श्लोक कृत्।

अहमस्मि प्रथमजा ऋता ३ स्य।

पूर्वं देवेभ्यो अमृतस्य ना ३ भायि।

यो मा ददाति स इदेव मा ३ वाः।

अह-मन्न-मन्न-मदन्तमा ३ द्मि।

अहं विश्वं भुवनमभ्य भवाम्।

सुवर्न ज्योतीः।

य एवं वेद। इत्युपनिषत् ॥ १० ॥

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ओं शान्तिः शान्तिः शान्तिः ॥

॥ हरिः ओ(३)म् ॥

॥ इति भृगुवल्ली समाप्ता ॥